Shloka

(in devanagari)

सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः ।
अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक् ॥ ३.१० ॥

(in English)

sahayajñāḥ prajāḥ sṛṣṭvā purōvāca prajāpatiḥ |
anēna prasaviṣyadhvamēṣa vō:'stviṣṭakāmadhuk || 3.10 ||

Index Ref 3rd chapter,10 of 43

पदच्छेदः सहयज्ञाः,प्रजाः,सृष्ट्वा,पुरा,उवाच,प्रजापतिः ।
अनेन,प्रसविष्यध्वम्,एषः,वः इष्टकामधुक् ॥

अन्वयार्थः

(Prose order with meaning & introduction to the word)

प्रजापतिः	सृष्टिकर्ता	the Prajapati
पुरा	पूर्वम्,सर्गादौ	in the beginning
सहयज्ञाः	कर्माधिकृताः,यज्ञसहिताः	together with Yajna
प्रजाः	मानवान्	mankind
सृष्ट्वा	विधाय,उत्पाद्य	having created
उवाच	अवदत्,अकथयत्	said
अनेन	एतेन (यज्ञेन)	by this
प्रसविष्यध्वम्	वृद्धिं प्राप्नुवन्तु	shall (ye) multiply
एषः	अयम् (यज्ञः)	this
वः इष्टकामधुक्	भवताम् अभीष्टदाता	your milch cow of desires
अस्तु	भवतु	let be

अर्थः प्रजापतिः पुरा सहयज्ञाः प्रजाः सृष्ट्वा उवाच । अनेन (यज्ञेन) प्रसविष्यध्वम् । एषः वः इष्टकामधुक् अस्तु ।

Meaning The Prajapati, having in the beginning created manking together with Yajna, said, "By this shall ye multiply; this shall be the milch cow of your desires.

तात्पर्यं सृष्टिकर्ता कल्पादौ वर्णोचितकर्मणा सह प्रजाः सृष्ट्वा अनेन कर्मणा भवन्तः वृद्धिं प्राप्नुवन्तु, इदं कर्म भवताम् अभीष्टदायकं भवतु इत्यवदत् ।

व्याकरणम्

सन्धिः

पुरोवाच	- पुरा	+ उवाच	गुणसन्धिः
एषः वः	- एषः	+ वः	विसर्गसन्धिः (लोपः) ।
वोऽस्तु	- वः	अस्तु	विसर्गसन्धिः (सकारः) रेफः, उकारः,गुणः,पूर्वरूपं च
अस्त्विष्टकामधुक्	- अस्तु	+ इष्टकामधुक्	यण् सन्धिः

समासः

सहयज्ञाः	- यज्ञेन सह वर्तन्ते	- बहुव्रीहिः ।
प्रजापतिः	प्रजानां पतिः	- षष्ठीतत्पुरुषः ।
इष्टकामधुक्	- इष्टाश्च ते कामाश्च इष्टकामाः इष्टकामान् दोग्धि	- कर्मधारयः । - कर्तरि क्विप् उपपदसमासश्च ।

कृदन्तः सृष्ट्वा - सृज् + क्त्वा ।